**Māṇḍūkyopaniṣad**

**Peace Invocation**

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाग्ँसस्तनूभिः । व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥ ॐ शान्तिः शान्तिः शान्तिः

Om bhadraṁ karṇebhiḥ śṛṇuyāma devāḥ | bhadraṁ paśyemākṣabhiryajatrāḥ | sthirairaṅgaistuṣṭuvāgm̐ sastanūbhiḥ | vyaśema devahitaṁ yadāyuḥ | svasti na indro vṛddhaśravāḥ | svasti naḥ pūṣā viśvavedāḥ | svasti nastārkṣyo ariṣṭanemiḥ | svasti no bṛhaspatirdadhātu || om śāntiḥ śāntiḥ śāntiḥ

**Upaniṣad**

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव॥ १॥

omityetadakṣaramidaṁ sarvaṁ tasyopavyākhyānaṁ bhūtaṁ bhavadbhaviṣyaditi sarvamoṅkāra eva| yaccānyat trikālātītaṁ tadapyoṅkāra eva || 1 ||

सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्॥ २॥

sarvaṁ hyetad brahmāyamātmā brahma so'yamātmā catuṣpāt || 2 ||

जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः ॥ ३॥

jāgaritasthāno bahiṣprajñaḥ saptāṅga ekonaviṁśatimukhaḥ sthūlabhugvaiśvānaraḥ prathamaḥ pādaḥ || 3 ||

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः॥ ४॥

svapnasthāno'ntaḥprajñaḥ saptāṅga ekonaviṁśatimukhaḥ praviviktabhuktaijaso dvitīyaḥ pādaḥ || 4 ||

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ॥ ५॥

yatra supto na kañcana kāmaṁ kāmayate na kañcana svapnaṁ paśyati tat suṣuptam | suṣuptasthāna ekībhūtaḥ prajñānaghana evānandamayo hyānandabhuk cetomukhaḥ prājñastṛtīyaḥ pādaḥ || 5 ||

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्॥ ६ ॥

eṣa sarveśvara eṣa sarvajña eṣo'ntaryāmyeṣa yoniḥ sarvasya prabhavāpyayau hi bhūtānām || 6 ||

**Kārikā**

बहिष्प्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः॥ का १॥

bahiṣprajño vibhurviśvo hyantaḥprajñastu taijasaḥ |
ghanaprajñastathā prājña eka eva tridhā smṛtaḥ || kā 1 ||

दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः।
आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः॥ का २॥

dakṣiṇākṣimukhe viśvo manasyantastu taijasaḥ |
ākāśe ca hṛdi prājñastridhā dehe vyavasthitaḥ || kā 2 ||

विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक्।
आनन्दभुक्तथा प्राज्ञस्त्रिधा भोगं निबोधत॥ का ३॥

viśvo hi sthūlabhuṅnityaṁ taijasaḥ praviviktabhuk |
ānandabhuktathā prājñastridhā bhoogaṁ nibodhata || kā 3 ||

स्थुलं तर्पयते विश्वं प्रविविक्तं तु तैजसम्।

आनन्दश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत॥ का ४॥

sthulaṁ tarpayate viśvaṁ praviviktaṁ tu taijasam |
ānandaśca tathā prājñaṁ tridhā tṛptiṁ nibodhata || kā 4 ||

त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः।

वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते॥ का ५॥

triṣu dhāmasu yadbhojyaṁ bhoktā yaśca prakīrtitaḥ |
vedaitadubhayaṁ yastu sa bhuñjāno na lipyate || kā 5 ||

प्रभवः सर्वभावानां सतामिति विनिश्चयः।

सर्वं जनयति प्राणश्चेतोंशून् पुरुषः पृथक्॥ का ६॥

prabhavaḥ sarvabhāvānāṁ satāmiti viniścayaḥ |
sarvaṁ janayati prāṇaścetoṁśūn puruṣaḥ pṛthak || kā 6 ||

विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः।

स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता॥ का ७॥

vibhūtiṁ prasavaṁ tvanye manyante sṛṣṭicintakāḥ |
svapnamāyāsarūpeti sṛṣṭiranyairvikalpitā || kā 7 ||

इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः।

कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः॥ का ८॥

icchāmātraṁ prabhoḥ sṛṣṭiriti sṛṣṭau viniścitāḥ |
kālātprasūtiṁ bhūtānāṁ manyante kālacintakāḥ || kā 8 ||

भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।

देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥ का ९ ॥

bhogārthaṁ sṛṣṭirityanye krīḍārthamiti cāpare |
devasyeṣa svabhāvo'yamāptakāmasya kā spṛhā || kā 9 ||

**Upaniṣad**

नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् ।

अदृष्टमव्यहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं

शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ उप ७ ॥

nāntaḥprajñaṁ na bahiṣprajñaṁ nobhayataḥprajñaṁ na prajñānaghanaṁ na prajñaṁ nāprajñam |
adṛṣṭamavyahāryamagrāhyamalakṣaṇamacintyamavyapadeśyamekātmapratyayasāraṁ prapañcopaśamaṁ śāntaṁ śivamadvaitaṁ caturthaṁ manyante sa ātmā sa vijñeyaḥ || upa 7 ||

**Kārikā**

निवृत्ते सर्वदुःखानामीशानः प्रभुरव्ययः ।

अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥ का १० ॥

nivṛtte sarvaduḥkhānāmīśānaḥ prabhuravyayaḥ |
advaitaḥ sarvabhāvānāṁ devasturyo vibhuḥ smṛtaḥ || kā 10 ||

कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।

प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ॥ का ११ ॥

kāryakāraṇabaddhau tāviṣyete viśvataijasau |
prājñaḥ kāraṇabaddhastu dvau tau turye na sidhyataḥ || kā 11 ||

नात्मानं न परांश्चैव न सत्यं नापि चानृतम् ।

प्राज्ञः किञ्चन संवेत्ति तुर्यं तत् सर्वदृक् सदा ॥ का १२ ॥

nātmānaṁ na parāṁścaiva na satyaṁ nāpi cānṛtam |
prājñaḥ kiñcana saṁvetti turyaṁ tat sarvadṛk sadā || kā 12 ||

द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः ।

बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते ॥ का १३ ॥

dvaitasyāgrahaṇaṁ tulyamubhayoḥ prājñaturyayoḥ |
bījanidrāyutaḥ prājñaḥ sā ca turye na vidyate || kā 13 ||

स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया ।

न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः ॥ का १४ ॥

svapnanidrāyutāvādyau prājñastvasvapnanidrayā |
na nidrāṁ naiva ca svapnaṁ turye paśyanti niścitāḥ || kā 14 ||

अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः ।

विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥ का १५ ॥

anyathā gṛhṇataḥ svapno nidrā tattvamajānataḥ |
viparyāse tayoḥ kṣīṇe turīyaṁ padamaśnute || kā 15 ||

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।

अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ का १६ ॥

anādimāyayā supto yadā jīvaḥ prabudhyate |
ajamanidramasvapnamadvaitaṁ budhyate tadā || kā 16 ||

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।

मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ का १७ ॥

prapañco yadi vidyeta nivarteta na saṁśayaḥ |
māyāmātramidaṁ dvaitamadvaitaṁ paramārthataḥ || kā 17 ||

विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।

उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ का १८ ॥

vikalpo vinivarteta kalpito yadi kenacit |
upadeśādayaṁ vādo jñāte dvaitaṁ na vidyate || kā 18 ||

**Upaniṣad**

सोऽयमात्माऽध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति ॥ ८ ॥

so'yamātmā'dhyakṣaramoṅkāro'dhimātraṁ pādā mātrā mātrāśca pādā akāra ukāro makāra iti || 8 ||

जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राऽऽप्तेरादिमत्त्वाद्वाऽऽप्नोति ह वै सर्वान् कामानादिश्च भवति य एवं वेद ॥ ९ ॥

jāgaritasthāno vaiśvānaro'kāraḥ prathamā mātrā''pterādimattvādvā''pnoti ha vai sarvān kāmānādiśca bhavati ya evaṁ veda || 9 ||

स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति नास्याब्रह्मवित् कुले भवति य एवं वेद ॥ १० ॥

svapnasthānastaijasa ukāro dvitīyā mātrotkarṣādubhayatvādvotkarṣati ha vai jñānasantatiṁ samānaśca bhavati nāsyābrahmavit kule bhavati ya evaṁ veda || 10 ||

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं

सर्वमपीतिश्च भवति य एवं वेद ॥ ११ ॥

suṣuptasthānaḥ prājño makārastṛtīyā mātrā miterapītervā minoti ha vā idaṁ
sarvamapītiśca bhavati ya evaṁ veda || 11 ||

**Kārikā**

विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटम् ।

मात्रासंप्रतिपत्तौ स्यादाप्तिसामान्यमेव च ॥ का १९ ॥

viśvasyātvavivakṣāyāmādisāmānyamutkaṭam |
mātrāsampratipattau syādāptisāmānyameva ca || kā 19 ||

तैजसस्योत्वविज्ञान उत्कर्षो दृश्यते स्फुतम् ।

मात्रासंप्रतिपत्तौ स्यादुभयत्वं तथाविधाम् ॥ का २० ॥

taijasasyotvavijñāna utkarṣo dṛśyate sphutam |
mātrāsampratipattau syādubhayatvaṁ tathāvidhām || kā 20 ||

मकारभावे प्राज्ञस्य मानसामान्यमुत्कटं ।

मात्रासंप्रतिपत्तौ तु लयसामान्यमेव च ॥ का २१ ॥

makārabhāve prājñasya mānasāmānyamutkaṭaṁ |
mātrāsampratipattau tu layasāmānyameva ca || kā 21 ||

त्रिषु धामसु यस्तुल्यं सामान्यं वेत्ति निश्चितः ।

स पूज्यः सर्वभूतानां वन्द्यश्चैव महामुनिः ॥ का २२ ॥

triṣu dhāmasu yastulyaṁ sāmānyaṁ vetti niścitaḥ |
sa pūjyaḥ sarvabhūtānāṁ vandyaścaiva mahāmuniḥ || kā 22 ||

अकारो नयते विश्वमुकारश्चापि तैजसम्।

मकारश्च पुनः प्राज्ञं नामात्रे विद्यते गतिः॥ का २३॥

akāro nayate viśvamukāraścāpi taijasam |
makāraśca punaḥ prājñaṁ nāmātre vidyate gatiḥ || kā 23 ||

**Upaniṣad**

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद॥ १२॥

amātraścaturtho'vyavahāryaḥ prapañcopaśamaḥ śivo'dvaita evamoṅkāra ātmaiva saṁviśatyātmanā''tmānaṁ ya evaṁ veda || 12 ||

इति माण्डूक्योपनिषत् समाप्ता॥

iti māṇḍūkyopaniṣat samāptā ||

**Kārikā**

ओंकारं पादशो विद्यात् पादा मात्रा न संशयः।

ओंकारं पादशो ज्ञात्वा न किंचिदपि चिन्तयेत्॥ २४॥

oṅkāraṁ pādaśo vidyāt pādā mātrā na saṁśayaḥ |
oṅkāraṁ pādaśo jñātvā na kiñcidapi cintayet || 24 ||

युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम्।

प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित्॥ २५॥

yuñjīta praṇave cetaḥ praṇavo brahma nirbhayam |
praṇave nityayuktasya na bhayaṁ vidyate kvacit || 25 ||

प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः।

अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः॥ २६ ॥

praṇavo hyaparaṁ brahma praṇavaśca paraḥ smṛtaḥ |
apūrvo'nantaro'bāhyo'naparaḥ praṇavo'vyayaḥ || 26 ||

सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च।

एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम्॥ २७ ॥

sarvasya praṇavo hyādirmadhyamantastathaiva ca |
evaṁ hi praṇavaṁ jñātvā vyaśnute tadanantaram || 27 ||

प्रणवं हीश्वरं विद्यात् सर्वस्य हृदि संस्थितम्।

सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति॥ २८ ॥

praṇavaṁ hīśvaraṁ vidyāt sarvasya hṛdi saṁsthitam |
sarvavyāpinamoṅkāraṁ matvā dhīro na śocati || 28 ||

अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः।

ओंकारो विदितो येन स मुनिर्नेतरो जनः॥ २९ ॥

amātro'nantamātraśca dvaitasyopaśamaḥ śivaḥ |
oṅkāro vidito yena sa munirnetaro janaḥ || 29 ||

## CHAPTER II
## VAITATHYA-PRAKARAṆA

वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः ।

अन्तःस्थानात्तु भावानां संवृतत्वेन हेतुना ॥ १ ॥

vaitathyaṁ sarvabhāvānāṁ svapna āhurmanīṣiṇaḥ |
antaḥsthānāttu bhāvānāṁ saṁvṛtatvena hetunā || 2.1 ||

अदीर्घत्वाच्च कालस्य गत्वा देशान्न पश्यति ।

प्रतिबुद्धश्च वै सर्वस्तस्मिन्देशे न विद्यते ॥ २ ॥

adīrghatvācca kālasya gatvā deśānna paśyati |
pratibuddhaśca vai sarvastasmindeśe na vidyate || 2.2 ||

अभावश्च रथादीनां श्रूयते न्यायपूर्वकम् ।

वैतथ्यं तेन वै प्राप्तं स्वप्न आहुः प्रकाशितम् ॥ ३ ॥

abhāvaśca rathādīnāṁ śrūyate nyāyapūrvakam |
vaitathyaṁ tena vai prāptaṁ svapna āhuḥ prakāśitam ||2. 3 ||

अन्तःस्थानातु भेदानां तस्माज्जागरिते स्मृतम् ।

यथा तत्र तथा स्वप्ने संवृतत्वेन भिद्यते ॥ ४ ॥

antaḥsthānātu bhedānāṁ tasmājjāgarite smṛtam |
yathā tatra tathā svapne saṁvṛtatvena bhidyate || 2.4 ||

स्वप्नजागिरितस्थाने ह्येकमाहुर्मनीषिणः ।

भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना ॥ ५ ॥

svapnajāgiritasthāne hyekamāhurmanīṣiṇaḥ |
bhedānāṁ hi samatvena prasiddhenaiva hetunā || 2.5 ||

आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।

वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ ६ ॥ ॥

ādāvante ca yannāsti vartamāne'pi tattathā |
vitathaiḥ sadṛśāḥ santo'vitathā iva lakṣitāḥ || 2.6 ||

स्वप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते ।

तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः ॥ ७ ॥

svaprayojanatā teṣāṁ svapne vipratipadyate |
tasmādādyantavattvena mithyaiva khalu te smṛtāḥ || 2.7 ||

अपूर्वं स्थानिधर्मो हि यथा स्वर्गनिवासिनाम् ।

तानयं प्रेक्षते गत्वा यथैवेह सुशिक्षितः ॥ ८ ॥

apūrvaṁ sthānidharmo hi yathā svarganivāsinām |
tānayaṁ prekṣate gatvā yathaiveha suśikṣitaḥ || 2.8 ||

स्वप्नवृत्तावपि त्वन्तश्चेतसा कल्पितं त्वसत् ।

बहिश्चेतोगृहीतं सद्दृष्टं वैतथ्यमेतयोः ॥ ९ ॥

svapnavṛttāvapi tvantaścetasā kalpitaṁ tvasat |
bahiścetogṛhītaṁ saddṛṣṭaṁ vaitathyametayoḥ || 2.9 ||

जाग्रद्वृत्तावपि त्वन्तश्चेतसा कल्पितं त्वसत् ।

बहिश्चेतोगृहीतं सद्युक्तं वैतथ्यमेतयोः ॥ १० ॥

jāgradvṛttāvapi tvantaścetasā kalpitaṁ tvasat |
bahiścetogṛhītaṁ sadyuktaṁ vaitathyametayoḥ || 2.10 ||

उभयोरपि वैतथ्यं भेदानां स्थानयोर्यदि ।

क एतान् बुध्यते भेदान् को वै तेषां विकल्पकः ॥२।११॥

ubhayorapi vaitathyaṁ bhedānāṁ sthānayoryadi |
ka etān budhyate bhedān ko vai teṣāṁ vikalpakaḥ ||2.11 ||

कल्पयत्यात्मनाऽऽत्मानमात्मा देवः स्वमायया ।

स एव बुध्यते भेदानिति वेदान्तनिश्चयः ॥ २।१२॥

kalpayatyātmanā''tmānamātmā devaḥ svamāyayā |
sa eva budhyate bhedāniti vedāntaniścayaḥ || 2.12||

विकरोत्यपरान्भावानन्तश्चित्ते व्यवस्थितान् ।

नियतांश्च बहिश्चित्त एवं कल्पयते प्रभुः ॥ २।१३॥

vikarotyaparānbhāvānantaścitte vyavasthitān |
niyatāṁśca bahiścitta evaṁ kalpayate prabhuḥ || 2.13||

चित्तकाला हि येऽन्तस्तु द्वयकालाश्च ये बहिः ।

कल्पिता एव ते सर्वे विशेषो नान्यहेतुकः ॥२।१४॥

cittakālā hi ye'antastu dvayakālāśca ye bahiḥ |
kalpitā eva te sarve viśeṣo nānyahetukaḥ ||2.14||

अव्यक्ता एव येऽन्तस्तु स्फुटा एव च ये बहिः ।

कल्पिता एव ते सर्वे विशेषस्त्वन्द्रियान्तरे ॥ २।१५॥

avyaktā eva ye'ntastu sphuṭā eva ca ye bahiḥ |
kalpitā eva te sarve viśeṣastvandriyāntare || 2|15||

जीवं कल्पयते पूर्वं ततो भावान् पृथग्विधान्।

बाह्यानाध्यात्मिकांश्चैव यथाविद्यस्तथास्मृतिः॥ २।१६॥

jīvaṁ kalpayate pūrvaṁ tato bhāvān pṛthagvidhān |
bāhyānādhyātmikāṁścaiva yathāvidyastathāsmṛtiḥ || 2.16 ||

अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता।

सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः॥ २।१७॥

aniścitā yathā rajjurandhakāre vikalpitā|
sarpadhārādibhirbhāvaustadvadātmā vikalpitaḥ || 2.17 ||

निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्तते।

रज्जुरेवेति चाद्वैतं तद्वदात्मविनिश्चयः॥ २।१८॥

niścitāyāṁ yathā rajjvāṁ vikalpo vinivartate |
rajjureveti cādvaitaṁ tadvadātmaviniścayaḥ || 2.18 ||

प्राणादिभिरनन्तैश्च भावैरेतैर्विकल्पितः।

मायैषा तस्य देवस्य यया संमोहितः स्वयम्॥ २।१९॥

prāṇādibhiranantaiśca bhāvairetairvikalpitaḥ |
māyaiṣā tasya devasya yayā sammohitaḥ svayam || 2.19 ||

प्राण इति प्राणविदो भूतानीति च तद्विदः।

गुणा इति गुणविदस्तत्वानीति च तद्विदः॥ २।२०॥

prāṇa iti prāṇavido bhūtānīti ca tadvidaḥ |
guṇā iti guṇavidastatvānīti ca tadvidaḥ || 2.20 ||

पादा इति पादविदो विषया इति तद्विदः ।

लोका इति लोकविदो देवा इति च तद्विदः ॥ २।२१ ॥

pādā iti pādavido viṣayā iti tadvidaḥ |
lokā iti lokavido devā iti ca tadvidaḥ || 2.21 ||

वेदा इति वेदविदो यज्ञा इति च तद्विदः ।

भोक्तेति च भोक्तृविदो भोज्यमिति च तद्विदः ॥ २।२२ ॥

vedā iti vedavido yajñā iti ca tadvidaḥ |
bhokteti ca bhoktṛvido bhojyamiti ca tadvidaḥ || 2.22 ||

सूक्ष्म इति सूक्ष्मविदः स्थूल इति च तद्विदः ।

मूर्त इति मुर्तविदोऽमूर्त इति च तद्विदः ॥ २।२३ ॥

sūkṣma iti sūkṣmavidaḥ sthūla iti ca tadvidaḥ |
mūrta iti murtavido'mūrta iti ca tadvidaḥ || 2.23 ||

काल इति कालविदो दिश इति च तद्विदः ।

वादा इति वादविदो भुवनानीति तद्विदः ॥ २।२४ ॥

kāla iti kālavido diśa iti ca tadvidaḥ |
vādā iti vādavido bhuvanānīti tadvidaḥ || 2.24 ||

मन इति मनोविदो बुद्धिरिति च तद्विदः ।

चित्तमिति चित्तविदो धर्माधर्मौ च तद्विदः ॥ २।२५ ॥

mana iti manovido buddhiriti ca tadvidaḥ |
cittamiti cittavido dharmādharmau ca tadvidaḥ || 2.25 ||

पञ्चविंशक इत्येके षड्विंश इति चापरे ।

एकत्रिंशक इत्याहुरनन्त इति चापरे ॥ २।२६ ॥

pañcaviṁśaka ityeke ṣaḍviṁśa iti cāpare |
ekatriṁśaka ityāhurananta iti cāpare || 2|26 ||

लोकाँल्लोकविदः प्राहुराश्रमा इति तद्विदः ।

स्त्रीपुंनपुंसकं लैङ्गाः परापरमथापरे ॥ २।२७ ॥

lokāṁllokavidaḥ prāhurāśramā iti tadvidaḥ |
strīpunnapuṁsakaṁ laiṅgāḥ parāparamathāpare || 2|27 ||

सृष्टिरिति सृष्टिविदो लय इति च तद्विदः ।

स्थितिरिति स्थितिविदः सर्वे चेह तु सर्वदा ॥ २।२८ ॥

sṛṣṭiriti sṛṣṭivido laya iti ca tadvidaḥ |
sthitiriti sthitividaḥ sarve ceha tu sarvadā || 2|28 ||

यं भावं दर्शयेद्यस्य तं भावं स तु पश्यति ।

तं चावति स भूत्वाऽसौ तद्ग्रहः समुपैति तम् ॥ २।२९ ॥

yaṁ bhāvaṁ darśayedyasya taṁ bhāvaṁ sa tu paśyati |
taṁ cāvati sa bhūtvā'sau tadgrahaḥ samupaiti tam || 2|29 ||

एतैरेषोऽपृथग्भावैः पृथगेवेति लक्षितः ।

एवं यो वेद तत्त्वेन कल्पयेत् सोऽविशङ्कितः ॥ २।३० ॥

etaireṣo'pṛthagbhāvaiḥ pṛthageveti lakṣitaḥ |
evaṁ yo veda tattvena kalpayet so'viśaṅkitaḥ || 2|30 ||

स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा ।

तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥ २ ।३१ ॥

svapnamāye yathā dṛṣṭe gandharvanagaraṁ yathā |
tathā viśvamidaṁ dṛṣṭaṁ vedānteṣu vicakṣaṇaiḥ || 2|31||

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।

न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ २ ।३२ ॥

na nirodho na cotpattirna baddho na ca sādhakaḥ |
na mumukṣurna vai mukta ityeṣā paramārthatā || 2|32 ||

भावैरसद्भिरेवायमद्वयेन च कल्पितः ।

भावा अप्यद्वयेनैव तस्मादद्वयता शिवा ॥ २ ।३३ ॥

bhāvairasadbhirevāyamadvayena ca kalpitaḥ |
bhāvā apyadvayenaiva tasmādadvayatā śivā || 2|33 ||

नात्मभावेन नानेदं न स्वेनापि कथंचन ।

न पृथङ् नापृथक् किंचिदिति तत्त्वविदो विदुः ॥ २ ।३४ ॥

nātmabhāvena nānedaṁ na svenāpi kathañcana |
na pṛthaṅ nāpṛthak kiñciditi tattvavido viduḥ || 2|34||

वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः ।

निर्विकल्पो ह्ययं दृष्टः प्रपञ्चोपशमोऽद्वयः ॥ २ ।३५ ॥

vītarāgabhayakrodhairmunibhirvedapāragaiḥ |
nirvikalpo hyayaṁ dṛṣṭaḥ prapañcopaśamo'dvayaḥ || 2|35 ||

तस्मादेवं विदित्वैनमद्वैते योजयेत् स्मृतिम् ।

अद्वैतं समनुप्राप्य जडवल्लोकमाचरेत् ॥ २ ।३६ ॥

tasmādevaṁ viditvainamadvaite yojayet smṛtim |
advaitaṁ samanuprāpya jaḍavallokamācaret || 2|36||

निस्तुतिर्निर्नमस्कारो निःस्वधाकार एव च ।

चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् ॥२ ।३७ ॥

nistutirnirnamaskāro niḥsvadhākāra eva ca |
calācalaniketaśca yatiryādṛcchiko bhavet ||2|37||

तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः ।

तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥२ ।३८ ॥

tattvamādhyātmikaṁ dṛṣṭvā tattvaṁ dṛṣṭvā tu bāhyataḥ |
tattvībhūtastadārāmastattvādapracyuto bhavet ||2|38||

## CHAPTER III
## ADVAITA-PRAKARAṆA

उपासनाश्रितो धर्मो जाते ब्रह्मणि वर्तते ।

प्रागुत्पत्तेरजं सर्वं तेनासौ कृपणः स्मृतः ॥ १ ॥

upāsanāśrito dharmo jāte brahmaṇi vartate |
prāgutpatterajaṁ sarvaṁ tenāsau kṛpaṇaḥ smṛtaḥ || 3.1 ||

अतो वक्ष्याम्यकार्पण्यमजाति समतां गतम् ।

यथा न जायते किंचिज्जायमानं समन्ततः ॥ २ ॥

ato vakṣyāmyakārpaṇyamajāti samatāṁ gatam |
yathā na jāyate kiñcijjāyamānaṁ samantataḥ || 3.2 ||

आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः ।

घटादिवच्च सङ्घातैर्जातावेतन्निदर्शनम् ॥ ३ ॥

ātmā hyākāśavajjīvairghaṭākāśairivoditaḥ |
ghaṭādivacca saṅghātairjātāvetannidarśanam || 3.3 ||

घादिषु प्रलीनेषु घटाकाशादयो यथा ।

आकाशे संप्रलीयन्ते तद्वज्जीवा इहात्मनि ॥ ४ ॥

ghādiṣu pralīneṣu ghaṭākāśādayo yathā |
ākāśe sampralīyante tadvajjīvā ihātmani || 3.4 ||

यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते ।

न सर्वे संप्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः ॥ ५ ॥

yathaikasmin ghaṭākāśe rajodhūmādibhiryute |
na sarve samprayujyante tadvajjīvāḥ sukhādibhiḥ || 3.5 ||

रूपकार्यसमाख्याश्च भिद्यन्ते तत्र तत्र वै ।

आकाशस्य न भेदोऽस्ति तद्वज्जीवेषु निर्णयः ॥ ६ ॥

rūpakāryasamākhyāśca bhidyante tatra tatra vai |
ākāśasya na bhedo'sti tadvajjīveṣu nirṇayaḥ || 3.6 ||

नाकाशस्य घटाकाशो विकारावयवौ यथा ।

नैवात्मनः सदा जीवो विकारावयवौ तथा । ७ ॥

nākāśasya ghaṭākāśo vikārāvayavau yathā |
naivātmanaḥ sadā jīvo vikārāvayavau tathā || 3.7 ||

यथा भवति बालानां गगनं मलिनं मलैः ।

तथा भवत्यबुद्धानामात्माऽपि मलिनो मलैः ॥ ८ ॥

yathā bhavati bālānāṁ gaganaṁ malinaṁ malaiḥ |
tathā bhavatyabuddhānāmātmā'pi malino malaiḥ || 3.8 ||

मरणे संभवे चैव गत्यागमनयोरपि ।

स्थितौ सर्वशरीरेषु आकाशेनाविलक्षणः ॥ ९ ॥

maraṇe sambhave caiva gatyāgamanayorapi |
sthitau sarvaśarīreṣu ākāśenāvilakṣaṇaḥ || 3.9 ||

संघाताः स्वप्नवत्सर्वे आत्ममायाविसर्गिताः ।

आधिक्ये सर्वसाम्ये वा नोपपत्तिर्हि विद्यते ॥ १० ॥

saṅghātāḥ svapnavatsarve ātmamāyāvirsagitāḥ |
ādhikye sarvasāmye vā noopapattirhi vidyate || 3.10 ||

रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके ।

तेषामात्मा परो जीवः खं यथा संप्रकाशितः ॥ ११ ॥

rasādayo hi ye kośā vyākhyātāstaittirīyake |
teṣāmātmā paro jīvaḥ khaṁ yathā samprakāśitaḥ || 3.11 ||

द्वयोर्द्वयोर्मधुज्ञाने परं ब्रह्म प्रकाशितम् ।

पृथिव्यामुदरे चैव यथाऽऽकाशः प्रकाशितः ॥१२ ॥

dvayordvayormadhujñāne paraṁ brahma prakāśitam |
pṛthivyāmudare caiva yathā''kāśaḥ prakāśitaḥ || 3.12 ||

जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते ।

नानात्वं निन्द्यते यच्च तदेवं हि समञ्जसम् ॥ १३ ॥

jīvātmanorananyatvamabhedena praśasyate |
nānātvaṁ nindyate yacca tadevaṁ hi samañjasam || 3.13 ||

जीवात्मनोः पृथक्त्वं यत्प्रागुत्पत्तेः प्रकीर्तितम् ।

भविष्यद्वृत्त्या गौणं तन्मुख्यत्वं हि न युज्यते ॥ १४ ॥

jīvātmanoḥ pṛthaktvaṁ yatprāgutpatteḥ prakīrtitam |
bhaviṣyadvṛttyā gauṇaṁ tanmukhyatvaṁ hi na yujyate || 3.14 ||

मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा ।

उपायः सोऽवताराय नास्ति भेदः कथंचन ॥ १५ ॥

mṛllohavisphuliṅgādyaiḥ sṛṣṭiryā coditā'nyathā |
upāyaḥ so'vatārāya nāsti bhedaḥ kathañcana || 3.15 ||

आश्रमास्त्रिविधा हीनमध्यमोत्कृष्टदृष्टयः ।

उपासनोपदिष्टेयं तदर्थमनुकम्पया ॥ १६ ॥

āśramāstrividhā hīnamadhyamotkṛṣṭadṛṣṭayaḥ ।
upāsanopadiṣṭeyaṁ tadarthamanukampayā ।। 3.16 ।।

स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम् ।

परस्परं विरुध्यन्ते तैरयं न विरुध्यते ॥ १७ ॥

svasiddhāntavyavasthāsu dvaitino niścitā dṛḍham ।
parasparaṁ virudhyante tairayaṁ na virudhyate ।। 3.17 ।।

अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते ।

तेषामुभयथा द्वैतं तेनायं न विरुध्यते ॥ १८ ॥

advaitaṁ paramārtho hi dvaitaṁ tadbheda ucyate ।
teṣāmubhayathā dvaitaṁ tenāyaṁ na virudhyate ।। 3.18 ।।

मायया भिद्यते ह्येतन्नान्यथाऽजं कथञ्चन ।

तत्त्वतो भिद्यमाने हि मर्त्यताममृतं व्रजेत् ॥ १९ ॥

māyayā bhidyate hyetannānyathā'jaṁ kathañcana ।
tattvato bhidyamāne hi martyatāmamṛtaṁ vrajet ।। 3.19 ।।

अजातस्यैव भावस्य जातिमिच्छन्ति वादिनः ।

अजातो ह्यमृतो भावो मर्त्यतां कथमेष्यति ॥ २० ॥

ajātasyaiva bhāvasya jātimicchanti vādinaḥ ।
ajāto hyamṛto bhāvo martyatāṁ kathameṣyati ।। 3.20 ।।

न भवत्यमृतं मर्त्यं न मर्त्यममृतं तथा ।

प्रकृतेरन्यथाभावो न कथञ्चिद्भविष्यति ॥ २१ ॥

na bhavatyamṛtaṁ martyaṁ na martyamamṛtaṁ tathā ।
prakṛteranyathābhāvo na kathañcidbhaviṣyati ।। 3.21 ।।

स्वभावेनामृतो यस्य भावो गच्छति मर्त्यताम् ।

कृतकेनामृतस्तस्य कथं स्थास्यति निश्चलः ॥ २२ ॥

svabhāvenāmṛto yasya bhāvo gacchati martyatām ।
kṛtakenāmṛtastasya kathaṁ sthāsyati niścalaḥ ।। 3.22 ।।

भूततोऽभूततो वाऽपि सृज्यमाने समा श्रुतिः ।

निश्चितं युक्तियुक्तं च यत्तद्भवति नेतरत् ॥ २३ ॥

bhūtato'bhūtato vā'pi sṛjyamāne samā śrutiḥ ।
niścitaṁ yuktiyuktaṁ ca yattadbhavati netarat ।। 3.23 ।।

नेह नानेति चाम्नायादिन्द्रो मायाभिरित्यपि ।

अजायमानो बहुधा मायया जायते तु सः ॥ २४ ॥

neha nāneti cāmnāyādindro māyābhirityapi।
ajāyamāno bahudhā māyayā jāyate tu saḥ ।। 3.24 ।।

संभूतेरपवादाच्च संभवः प्रतिषिध्यते ।

को न्वेनं जनयेदिति कारणं प्रतिषिध्यते ॥ २५ ॥

sambhūterapavādācca sambhavaḥ pratiṣidhyate ।
ko nvenaṁ janayediti kāraṇaṁ pratiṣidhyate ।। 3.25 ।।

स एष नेति नेतीति व्याख्यातं निह्नुते यतः ।

सर्वमग्राह्यभावेन हेतुनाऽजं प्रकाशते ॥ २६ ॥

sa eṣa neti netīti vyākhyātaṁ nihnute yataḥ |
sarvamagrāhyabhāvena hetunā'jaṁ prakāśate || 3.26 ||

सतो हि मायया जन्म युज्यते न तु तत्वतः ।

तत्त्वतो जायते यस्य जातं तस्य हि जायते ॥ २७ ॥

sato hi māyayā janma yujyate na tu tatvataḥ |
tattvato jāyate yasya jātaṁ tasya hi jāyate || 3.27 ||

असतो मायया जन्म तत्त्वतो नैव युज्यते ।

बन्ध्यापुत्रो न तत्त्वेन मायया वाऽपि जायते ॥ २८ ॥

asato māyayā janma tattvato naiva yujyate |
bandhyāputro na tattvena māyayā vā'pi jāyate || 3.28 ||

यथा स्वप्ने द्वयाभासं स्पन्दते मायया मनः ।

तथा जाग्रद्द्वयाभासं स्पन्दते मायया मनः ॥ २९ ॥

yathā svapne dvayābhāsaṁ spandate māyayā manaḥ |
tathā jāgraddvayābhāsaṁ spandate māyayā manaḥ || 3.29 ||

अद्वयं च द्वयाभासं मनः स्वप्ने न संशयः ।

अद्वयं च द्वयाभासं तथा जाग्रन्न संशयः ॥ ३० ॥

advayaṁ ca dvayābhāsaṁ manaḥ svapne na saṁśayaḥ |
advayaṁ ca dvayābhāsaṁ tathā jāgranna saṁśayaḥ || 3.30 ||

मनोदृश्यमिदं द्वैतं यत्किंचित्सचराचरम् ।

मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते ॥ ३१ ॥

manodṛśyamidaṁ dvaitaṁ yatkiñcitsacarācaram |
manaso hyamanībhāve dvaitaṁ naivopalabhyate || 3.31 ||

आत्मसत्यानुबोधेन न सङ्कल्पयते यदा ।

अमनस्तां तदा याति ग्राह्याभावे तदग्रहम् ॥ ३२ ॥

ātmasatyānubodhena na saṅkalpayate yadā|
amanastāṁ tadā yāti grāhyābhāve tadagraham || 3.32 ||

अकल्पकमजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते ।

ब्रह्मज्ञेयमजं नित्यमजेनाजं विबुध्यते ॥ ३३ ॥

akalpakamajaṁ jñānaṁ jñeyābhinnaṁ pracakṣate |
brahmajñeyamajaṁ nityamajenājaṁ vibudhyate || 3.33 ||

निगृहीतस्य मनसो निर्विकल्पस्य धीमतः ।

प्रचारः स तु विज्ञेयः सुषुप्तेऽन्यो न तत्समः ॥ ३४ ॥

nigṛhītasya manaso nirvikalpasya dhīmataḥ |
pracāraḥ sa tu vijñeyaḥ suṣupte'nyo na tatsamaḥ || 3.34 ||

लीयते हि सुषुप्ते तन्निगृहीतं न लीयते ।

तदेव निर्भवं ब्रह्म ज्ञानालोकं समन्ततः ॥ ३५ ॥

līyate hi suṣupte tannigṛhītaṁ na līyate |
tadeva nirbhavaṁ brahma jñānālokaṁ samantataḥ || 3.35 ||

अजमनिद्रमस्वप्नमनामकमरूपकम् ।

सकृद्विभातं सर्वज्ञं नोपचारः कथञ्चन ॥ ३६ ॥

ajamanidramasvapnamanāmakamarūpakam |
sakṛdvibhātaṁ sarvajñaṁ nopacāraḥ kathañcana || 3.36 ||

सर्वाभिलापविगतः सर्वचिन्तासमुत्थितः ।

सुप्रशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः ॥ ३७ ॥

sarvābhilāpavigataḥ sarvacintāsamutthitaḥ |
supraśāntaḥ sakṛjjyotiḥ samādhiracalo'bhayaḥ || 3.37 ||

ग्रहो न तत्र नोत्सर्गश्चिन्ता यत्र न विद्यते ।

आत्मसंस्थं तदा ज्ञानमजाति समतां गतम् ॥ ३८ ॥

graho na tatra notsargaścintā yatra na vidyate |
ātmasaṁsthaṁ tadā jñānamajāti samatāṁ gatam || 3.38 ||

अस्पर्शयोगो वै नाम दुर्दर्शः सर्वयोगिभिः ।

योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः ॥ ३९ ॥

asparśayogo vai nāma durdarśaḥ sarvayogibhiḥ |
yogino bibhyati hyasmādabhaye bhayadarśinaḥ || 3.39 ||

मनसो निग्रहायत्तमभयं सर्वयोगिनाम् ।

दुःखक्षयः प्रबोधश्चाप्यक्षया शन्तिरेव च ॥ ४० ॥

manaso nigrahāyattamabhayaṁ sarvayoginām |
duḥkhakṣayaḥ prabodhaścāpyakṣayā śantireva ca || 3.40 ||

उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना ।

मनसो निग्रहस्तद्वद्भवेदपरिखेदतः ॥ ४१ ॥

utseka udadheryadvatkuśāgreṇaikabindunā |
manaso nigrahastadvadbhavedaparikhedataḥ || 3.41 ||

उपायेन निगृह्णीयाद्विक्षिप्तं कामभोगयोः ।

सुप्रसन्नं लये चैव यथा कामो लयस्तथा ॥ ४२ ॥

upāyena nigṛhṇīyādvikṣiptaṁ kāmabhogayoḥ |
suprasannaṁ laye caiva yathā kāmo layastathā || 3.42 ||

दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् ।

अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति ॥ ४३ ॥

duḥkhaṁ sarvamanusmṛtya kāmabhogānnivartayet |
ajaṁ sarvamanusmṛtya jātaṁ naiva tu paśyati || 3.43 ||

लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।

सकषायं बिजानीयात्समप्राप्तं न चालयेत् ॥ ४४ ॥

laye sambodhayeccittaṁ vikṣiptaṁ śamayetpunaḥ |
sakaṣāyaṁ bijānīyātsamaprāptaṁ na cālayet || 3.44 ||

नास्वादयेत्सुखं तत्र निःसङ्गः प्रज्ञया भवेत् ।

निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः ॥ ४५ ॥

nāsvādayetsukhaṁ tatra niḥsaṅgaḥ prajñayā bhavet |
niścalaṁ niścaraccittamekīkuryātprayatnataḥ || 3.45 ||

यदा न लीयते चित्तं न च विक्षिप्यते पुनः ।

अनिङ्गनमनाभासं  निष्पन्नं ब्रह्म तत्तदा ॥ ४६ ॥

yadā na līyate cittaṁ na ca vikṣipyate punaḥ |
aniṅganamanābhāsaṁ  niṣpannaṁ brahma tattadā || 3.46 ||

स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम् ।

अजमजेन ज्ञेयेन सर्वज्ञं परिचक्षते ॥ ४७ ॥

svasthaṁ śāntaṁ sanirvāṇamakathyaṁ sukhamuttamam |
ajamajena jñeyena sarvajñaṁ paricakṣate || 3.47 ||

न कश्चिज्जायते जीवः संभवोऽस्य न विद्यते ।

एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ॥ ४८ ॥

na kaścijjāyate jīvaḥ sambhavo'sya na vidyate |
etattaduttamaṁ satyaṁ yatra kiñcinna jāyate || 3.48 ||

## CHAPTER IV
## ALĀTAŚĀNTI-PRAKARA

ज्ञानेनाकाशकल्पेन धर्मान्यो गगनोपमान्

ज्ञेयाभिन्नेन संबुद्धस्तं वन्दे द्विपदां वरम् ॥ १ ॥

jñānenākāśakalpena dharmānyo gaganopamān
jñeyābhinnena sambuddhastaṁ vande dvipadāṁ varam || 4.1 ||

अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः ।

अविवादोऽविरुद्धश्च देशितस्तं नमाम्यहम् ॥ २ ॥

asparśayogo vai nāma sarvasattvasukho hitaḥ |
avivādo'viruddhaśca deśitastaṁ namāmyaham || 4.2 ||

भूतस्य जातिमिच्छन्ति वादिनः केचिदेव हि ।

अभूतस्यापरे धीरा विवदन्तः परस्परम् ॥ ३ ॥

bhūtasya jātimicchanti vādinaḥ kecideva hi |
abhūtasyāpare dhīrā vivadantaḥ parasparam || 4.3 ||

भूतं न जायते किंचिदभूतं नैव जायते ।

विवदन्तोऽद्वया ह्येवमजातिं ख्यापयन्ति ते ॥ ४ ॥

bhūtaṁ na jāyate kiñcidabhūtaṁ naiva jāyate |
vivadanto'dvayā hyevamajātiṁ khyāpayanti te || 4.4 ||

ख्याप्यमानामजातिं तैरनुमोदामहे वयम् ।

विवदामो न तैः सार्धमविवादं निबोधत ॥ ५ ॥

khyāpyamānāmajātiṁ tairanumodāmahe vayam |
vivadāmo na taiḥ sārdhamavivādaṁ nibodhata || 4.5 ||

अजातस्यैव धर्मस्य जातिमिच्छन्ति वादिनः।

अजातो ह्यमृतो धर्मो मर्त्यतां कथमेष्यति॥ ६॥

ajātasyaiva dharmasya jātimicchanti vādinaḥ |
ajāto hyamṛto dharmo martyatāṁ kathameṣyati || 4.6 ||

न भवत्यमृतं मर्त्यं न मर्त्यममृतं तथा।

प्रकृतेरन्यथाभावो न कथंचिद्भविष्यति॥ ७॥

na bhavatyamṛtaṁ martyaṁ na martyamamṛtaṁ tathā |
prakṛteranyathābhāvo na kathañcidbhaviṣyati || 4.7 ||

स्वभावेनामृतो यस्य धर्मो गच्छति मर्त्यताम्।

कृतकेनामृतस्तस्य कथं स्थास्यति निश्चलः॥ ८।

svabhāvenāmṛto yasya dharmo gacchati martyatām |
kṛtakenāmṛtastasya kathaṁ sthāsyati niścalaḥ || 4.8 ||

सांसिद्धिकी स्वाभाविकी सहजा अकृता च या।

प्रकृतिः सेति विज्ञेया स्वभावं न जहाति या। ९॥

sāṁsiddhikī svābhāvikī sahajā akṛtā ca yā |
prakṛtiḥ seti vijñeyā svabhāvaṁ na jahāti yā || 4.9 ||

जरामरणनिर्मुक्ताः सर्वे धर्माः स्वभावतः।

जरामरणमिच्छन्तश्च्यवन्ते तन्मनीषया॥ १०॥

jarāmaraṇanirmuktāḥ sarve dharmāḥ svabhāvataḥ |
jarāmaraṇamicchantaścyavante tanmanīṣayā || 4.10 ||

कारणं यस्य वै कार्यं कारणं तस्य जायते ।

जायमानं कथमजं भिन्नं नित्यं कथं च तत् ॥ ११ ॥

kāraṇaṁ yasya vai kāryaṁ kāraṇaṁ tasya jāyate |
jāyamānaṁ kathamajaṁ bhinnaṁ nityaṁ kathaṁ ca tat || 4.11 ||

कारणाद्यद्यनन्यत्वमतः कार्यमजं यदि ।

जायमानाद्धि वै कार्यात्कारणं ते कथं ध्रुवम् ॥ १२ ॥

kāraṇādyadyananyatvamataḥ kāryamajaṁ yadi |
jāyamānāddhi vai kāryātkāraṇaṁ te kathaṁ dhruvam || 4.12 ||

अजाद्वै जायते यस्य दृष्टान्तस्तस्य नास्ति वै ।

जाताच्च जायमानस्य न व्यवस्था प्रसज्यते ॥ १३ ॥

ajādvai jāyate yasya dṛṣṭāntastasya nāsti vai |
jātācca jāyamānasya na vyavasthā prasajyate || 4.13 ||

हेतोरादिः फलं येषामादिर्हेतुः फलस्य च ।

हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यते ॥ १४ ॥

hetorādiḥ phalaṁ yeṣāmādirhetuḥ phalasya ca |
hetoḥ phalasya cānādiḥ kathaṁ tairupavarṇyate || 4.14 ||

हेतोरादिः फलं येषामादिर्हेतुः फलस्य च ।

तथा जन्म भवेत्तेषां पुत्राज्जन्म पितुर्यथा ॥ १५ ॥

hetorādiḥ phalaṁ yeṣāmādirhetuḥ phalasya ca |
tathā janma bhavetteṣāṁ putrājjanma pituryathā || 4.15 ||

संभवे हेतुफलयोरेषितव्यः क्रमस्त्वया ।

युगपत्संभवे यस्मादसंबन्धो विषाणवत् ॥ १६ ॥

sambhave hetuphalayoreṣitavyaḥ kramastvayā ।
yugapatsambhave yasmādasambandho viṣāṇavat || 4.16 ||

फलादुत्पद्यमानः सन्न ते हेतुः प्रसिध्यति ।

अप्रसिद्धः कथं हेतुः फलमुत्पादयिष्यति ॥ १७ ॥

phalādutpadyamānaḥ sanna te hetuḥ prasidhyati ।
aprasiddhaḥ kathaṁ hetuḥ phalamutpādayiṣyati || 4.17 ||

यदि हेतोः फलात्सिद्धिः फलसिद्धिश्च हेतुतः ।

कतरत् पूर्वनिष्पन्नं यस्य सिद्धिरपेक्षया ॥ १८ ॥

yadi hetoḥ phalātsiddhiḥ phalasiddhiśca hetutaḥ ।
katarat pūrvaniṣpannaṁ yasya siddhirapekṣayā || 4.18 ||

अशक्तिरपरिज्ञानं क्रमकोपोऽथवा पुनः ।

एवं हि सर्वथा बुद्धैरजातिः परिदीपिता ॥ १९ ।

aśaktiraparijñānaṁ kramakopo'thavā punaḥ ।
evaṁ hi sarvathā buddhairajātiḥ paridīpitā || 4.19।

बिजाङ्कुराख्यो दृष्टान्तः सदा साध्यसमो हि सह ।

न हि साध्यसमो हेतुः सिद्धौ साध्यस्य युज्यते ॥ २० ॥

bijāṅkurākhyo dṛṣṭāntaḥ sadā sādhyasamo hi saha ।
na hi sādhyasamo hetuḥ siddhau sādhyasya yujyate || 4.20 ||

पूर्वापरापरिज्ञानमजातेः परिदीपकम् ।

जायमानाद्धि वै धर्मात् कथं पूर्वं न गृह्यते ॥ २१ ॥

pūrvāparāparijñānamajāteḥ paridīpakam ।
jāyamānāddhi vai dharmāt kathaṁ pūrvaṁ na gṛhyate ।। 4.21 ।।

स्वतो वा परतो वाऽपि न किंचिद्वस्तु जायते ।

सदसत् सदसद्वाऽपि न किंचिद्वस्तु जायते ॥ २२ ॥

svato vā parato vā'pi na kiñcidvastu jāyate ।
sadasat sadasadvā'pi na kiñcidvastu jāyate ।। 4.22 ।।

हेतुर्न जायतेऽनादेः फलं चापि स्वभावतः ।

आदिर्न विद्यते यस्य तस्य ह्यादिर्न विद्यते ॥ २३ ॥

heturna jāyate'nādeḥ phalaṁ cāpi svabhāvataḥ ।
ādirna vidyate yasya tasya hyādirna vidyate ।। 4.23 ।।

प्रज्ञप्तेः सनिमित्तत्वमन्यथा द्वयनाशतः ।

संक्लेशस्योपलब्धेश्च परतन्त्रास्तिता मता ॥ २४ ॥

prajñapteḥ sanimittatvamanyathā dvayanāśataḥ ।
saṅkleśasyopalabdheśca paratantrāstitā matā ।। 4.24 ।।

प्रज्ञप्तेः सनिमित्तत्वमिष्यते युक्तिदर्शनात् ।

निमित्तस्यानिमित्तत्वमिष्यते भूतदर्शनात् । २५ ॥

prajñapteḥ sanimittatvamiṣyate yuktidarśanāt ।
nimittasyānimittatvamiṣyate bhūtadarśanāt । 4.25 ।।

चित्तिं न संस्पृशत्यर्थं नार्थाभासं तथैव च ।

अभूतो हि यतश्चार्थो नार्थाभासस्ततः पृथक् ॥ २६ ॥

cittiṁ na saṁspṛśatyarthaṁ nārthābhāsaṁ tathaiva ca |
abhūto hi yataścārtho nārthābhāsastataḥ pṛthak || 4.26 ||

निमित्तं न सदा चित्तं संस्पृशत्यध्वसु त्रिषु ।

अनिमित्तो विपर्यासः कथं तस्य भविष्यति ॥ २७ ॥

nimittaṁ na sadā cittaṁ saṁspṛśatyadhvasu triṣu |
animitto viparyāsaḥ kathaṁ tasya bhaviṣyati || 4.27 ||

तस्मान्न जायते चित्तं चित्तदृश्यं न जायते ।

तस्य पश्यन्ति ये जातिं खे वै पश्यन्ति ते पदम् ॥ २८ ॥

tasmānna jāyate cittaṁ cittadṛśyaṁ na jāyate |
tasya paśyanti ye jātiṁ khe vai paśyanti te padam || 4.28 ||

अजातं जायते यस्मादजातिः प्रकृतिस्ततः ।

प्रकृतेरन्यथाभावो न कथंचिद्भविष्यति ॥ २९ ॥

ajātaṁ jāyate yasmādajātiḥ prakṛtistataḥ |
prakṛteranyathābhāvo na kathañcidbhaviṣyati || 4.29 ||

अनादेरन्तवत्त्वं च संसारस्य न सेत्स्यति ।

अनन्तता चादिमतो मोक्षस्य न भविष्यति ॥ ३० ॥

anāderantavattvaṁ ca saṁsārasya na setsyati |
anantatā cādimato mokṣasya na bhaviṣyati || 4.30 ||

आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।

वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ ३१ ॥

āadāvante ca yannāsti vartamāne'pi tattathā |
vitathaiḥ sadṛśāḥ santo'vitathā iva lakṣitāḥ || 4.31 ||

सप्रयोजनता तषां स्वप्ने विप्रतिपद्यते ।

तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः ॥ ३२ ॥

saprayojanatā taṣāṁ svapne vipratipadyate |
tasmādādyantavattvena mithyaiva khalu te smṛtāḥ || 4.32 ||

सर्वे धर्मा मृषा स्वप्ने कायस्यान्तर्निदर्शनात् ।

संवृतेऽस्मिन् प्रदेशे वै भूतानां दर्शनं कुतः ॥ ३३ ॥

sarve dharmā mṛṣā svapne kāyasyāntarnidarśanāt |
saṁvṛte'smin pradeśe vai bhūtānāṁ darśanaṁ kutaḥ || 4.33 ||

न युक्तं दर्शनं गत्वा कालस्यानियमाद्गतौ ।

प्रतिबुद्धश्च वै सर्वस्तस्मिन् देशे न विद्यते ॥ ३४ ॥

na yuktaṁ darśanaṁ gatvā kālasyāniyamādgatau |
pratibuddhaśca vai sarvastasmin deśe na vidyate || 4.34 ||

मित्राद्यैः सह संमन्त्र्य संबुद्धो न प्रपद्यते ।

गृहीतं चापि यत्किंचित्प्रतिबुद्धो न पश्यति ॥ ३५ ॥

mitrādyaiḥ saha sammantrya sambuddho na prapadyate |
gṛhītaṁ cāpi yatkiñcitpratibuddho na paśyati || 4.35 ||

स्वप्ने चावस्तुकः कायः पृथगन्यस्य वर्शनात्।

यथा कायस्तथा सर्वं चित्तदृश्यमवस्तुकम्॥ ३६॥

svapne cāvastukaḥ kāyaḥ pṛthaganyasya varśanāt |
yathā kāyastathā sarvaṁ cittadṛśyamavastukam || 4.36 ||

ग्राहणाज्जागरितवत्तद्धेतुः स्वप्न इष्यते।

तद्धेतुत्वात्तु तस्यैव सज्जागरितमिष्यते॥ ३७॥

grāhaṇājjāgaritavattaddhetuḥ svapna iṣyate |
taddhetutvāttu tasyaiva sajjāgaritamiṣyate || 4.37 ||

उत्पादस्याप्रसिद्धत्वादजं सर्वमुदाहृतम्।

न च भूतादभूतस्य संभवोऽस्ति कथंचन॥३८॥

utpādasyāprasiddhatvādajaṁ sarvamudāhṛtam |
na ca bhūtādabhūtasya sambhavo'sti kathañcana || 4.38 ||

असज्जागरिते दृष्ट्वा स्वप्ने पश्यति तन्मयः।

असत्स्वप्नेऽपि दृष्ट्वा च प्रतिबुद्धो न पश्यति॥ ३९॥

asajjāgarite dṛṣṭvā svapne paśyati tanmayaḥ |
asatsvapne'pi dṛṣṭvā ca pratibuddho na paśyati || 4.39 ||

नास्त्यसद्धेतुकमसत्सदसद्धेतुकं तथा।

सच्च सद्धेतुकं नास्ति सद्धेतुकमसत्कुतः॥ ४०॥

nāstyasaddhetukamasatsadasaddhetukaṁ tathā |
sacca saddhetukaṁ nāsti saddhetukamasatkutaḥ || 4.40 ||